7

विश्वासो नैव कर्तव्यम्



एकं वनम् अस्ति । वने एका अजा अस्ति ।

सा स्वस्य पुत्रं वदति “पुत्र, अहं बहिः गच्छामि ।

अहं शीघ्रंम् आगच्छामि । अत्र एव तिष्ठतु ।”

अजा वनं गच्छति ।

शिशुः अपि अनुसरणं करोति ।

शिशुः मार्गं विस्मरति । अतः सः रोदिति ।

शृगालः शिशुं पश्यति ।

सः सुकोमलं मांसं खादितुम् इच्छति ।





शृगालः वदति, “भवान्, कः ? किमर्थं रोदिति ?”

समस्यां ज्ञात्वा अति करुणतया सः वदति, “चिन्ता मास्तु, अहं मातुः समीपं नेष्यामि । मया सह चलतु । सा मम परिचिता अस्ति ।”

अजाशिशुः वदति “अहं भवन्तं न जानामि ।

मम माता वदति यत् अपरिचितेन सह कुत्रापि न गमनीयम् इति ।” वञ्चकः शृगालः वदति, “मम विषये मा चिन्तयतु । पश्यतु तत्र एकः पिप्पलवृक्षः अस्ति । तत्र भवतः माता अन्विष्यति ।”





अजाशिशुः शृगालेन सह गच्छति । तस्मिन् क्षणे अजा आगच्छति । स्वपुत्रेण सह वञ्चकं शृगालं दृष्ट्वा वदति “पुत्र, भवान् एतेन सह कुत्र गच्छति ? अस्य विश्वासः न कर्तव्यः ।”

शिशुः मातुः समीपं धावति ।

शिशुमुखात् घटनां श्रुत्वा अजा क्रुध्यति ।

अजा शृगालं प्रहरति । शृगालः पलायते ।





अजा शिशुं वदति, “पुत्र, अपरिचितस्य उपरि कदापि विश्वासः नैव कर्तव्यः । न मैत्री कर्तव्या न कुत्रापि गमनीयम् ।”

टिप्पणी

अजा બકરી **स्वस्य** પોતાનો **बहिः** બહાર **शीघ्रम्** ઝડપથી **तिष्ठतु** ઊભો રહે. **अतः** આથી **शृगालः** શિયાળ **गमनीयम्** જવું જોઈએ **नेष्यामि** લઈ જઈશ. **भवान कः** આપ કોણ ? **वञ्चकः** છેતરનારો, લુચ્ચો **पिप्पलवृक्षः** પીપળાનું ઝાડ **अन्विष्यति** શોધે છે. **दृष्ट्वा** જોઈને **श्रुत्वा** સાંભળીને **क्रुध्यति** ક્રોધ કરે છે **प्रहरति** પ્રહાર કરે છે.

विशेषः

नैव : न एव, कुत्रापि : कुत्र अपि, कदापि : कदा अपि

स्वाध्यायः

1. નીચેના શબ્દોનું મોટેથી ઉચ્ચારણ કરો:

स्वस्य, शीघ्रम्, तिष्ठतु, विस्मरति, खादितुम्, करुणतया,

नेष्यामि, वञ्चकः, पिप्पलवृक्षः, अन्विष्यति, शृगालेन, क्रुध्यति

2. નીચેના પ્રશ્નોના ઉત્તર સંસ્કૃતમાં આપો અને લખો:

(૧) अजा कुत्र गच्छति ?

(૨) कः रोदिति ?

(૩) शृगालः अजा शिशुं दृष्ट्वा किम् इच्छति ?

(૪) कः वञ्चकः अस्ति ?

(૫) शिशुमुखात् घटनां श्रुत्वा अजा किं करोति ?

(૬) अजा शिशुं किं वदति ?

(૭) वार्तायाः शीर्षकः कः ?

3. નીચેના શબ્દોને સંસ્કૃત ભાષામાં લખો.

(૧) લુચ્ચું

(૨) પીપળાનું ઝાડ

(૩) બકરી

(૪) તરત

(૫) અજાણ્યો

(૬) દોડે છે.

(૭) મારવું

(૮) ભાગી જાય છે.

4. નીચેનાં વાક્યોને ઘટનાક્રમમાં ગોઠવો.

(૧) "पुत्र, अपरिचितस्य उपरि कदापि विश्वासः नैव कर्तव्यः ।

(૨) अजाशिशुः शृगालेन सह गच्छति ।

(૩) पुत्र, अहं बहिः गच्छामि ।

(૪) शृगालः शिशुं पश्यति ।

(૫) "चिन्ता मास्तु, अहं मातुः पार्श्वे नेष्यामि" ।

(૬) शिशु मुखात् घटनां श्रुत्वा अजा क्रुध्यति ।

5. પ્રસ્તુત પાઠમાં कर्तव्यः, गमनीयः જેવાં રૂપોનો અભ્યાસ કર્યો. 'આમ કરવું જોઈએ' અથવા 'આમ થવું જોઈએ' એ અર્થમાં આવાં રૂપો વપરાય છે. ઉદાહરણમાં દર્શાવ્યા મુજબ અન્ય શબ્દોની રચના કરો:

(૧) दर्शन - दर्शनीय (દર્શન કરવા યોગ્ય)

(૨) गम् - _____ (જવા યોગ્ય)

(૩) पठ् - _____ (પઠન કરવા યોગ્ય)

(૪) वन्द् - _____ (વંદન કરવા યોગ્ય)

(૫) पूज् - _____ (પૂજન કરવા યોગ્ય)

6. ઉદાહરણ મુજબ કૌંસમાંના શબ્દોનો ઉપયોગ કરી વાક્યરચના કરો:

(૧) बालः _____ _____ इच्छति । (रोटिका, खाद्)

- बालः रोटिकां खादितुम् इच्छति ।

(૨) छात्रा _____ _____ इच्छति । (पाठ , पठ्)

(૩) शिक्षकः _____ _____ इच्छति । (कथा, कथय)

(૪) सरला _____ _____ इच्छति । (क्रीडा, क्रीड्)

(૫) प्रणवः _____ _____ इच्छति । (चित्र, रचय)

7. કૌંસમાં આપેલા પદોને આધારે ખાલી જગ્યા પૂરો: (एकः, एका, एकम्)

(૧) _____ अश्वः धावति ।

(૨) _____ बालकः क्रीडति ।

(૩) _____ बाला पठति ।

(૪) _____ मन्दिरम् अस्ति ।

(૫) _____ शाला अस्ति ।

(૬) _____ चित्रं पश्यामि ।

प्रवृत्ति

- તમારા શિક્ષક આ પાઠના જે શબ્દો બોલે તેનું શ્રુતલેખન કરો.
- જૂથમાં બેસી આ પાઠનું આદર્શ પઠન કરો.
- આ પાઠની રજૂઆત મહોરાં પહેરી અભિનય સાથે કરો.
- પાઠની વાર્તા તમારા મિત્રોને સંભળાવો.

ज्ञातव्यम्

- अधिकारी - અધિકારી
- उट्टङ्कः - ટાઇપિસ્ટ
- प्राध्यापकः - ÆÜÂÜÁÑÜÜÆÜÜ
- अधिवक्ता - વકીલ
- विक्रयिकः - વિક્રેતા, વેચનાર
- अभियन्ता - ઇજનેર
- लेखापकारः - લહિયો
- व्याख्याता - વ્યાખ્યાતા